শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে

# ॥ শ্রীগাযত্রীরামাযণম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীগাযত্রীরামাযণম্ ॥

তপস্স্বাধ্যাযনিরতং তপস্বী ৱাগ্ৱিদাং ৱরম্।
নারদং পরিপপ্রচ্ছ ৱাল্মীকির্মুনিপুঙ্গৱম্॥ **1** ॥

স হৎৱা রাক্ষসান্ সর্ৱান্ যজ্ঞঘ্নান্ রঘুনন্দনঃ।
ঋষিভিঃ পূজিতস্সম্যগ্যথেন্দ্রো ৱিজযী পুরা॥ **2** ॥

ৱিশ্ৱামিত্রঃ স ধর্মাত্মা শ্রুৎৱা জনকভাষিতম্।
ৱৎস রাম ধনুঃ পশ্য ইতি রাঘৱমব্রৱীৎ॥ **3** ॥

তুষ্টাৱাস্য তদা ৱংশং প্রৱিশ্য স ৱিশাংপতেঃ।
শযনীযং নরেন্দ্রস্য তদাসাদ্য ৱ্যতিষ্ঠত॥ **4** ॥

ৱনৱাসং হি সঙ্খ্যায ৱাসাংস্যাভরণানি চ।
ভর্তারমনুগচ্ছন্ত্যৈ সীতাযৈ শ্ৱশুরো দদৌ॥ **5** ॥

রাজা সত্যং চ ধর্মশ্চ রাজা কুলৱতাং কুলম্।
রাজা মাতা পিতা চৈৱ রাজা হিতকরো নৃণাম্॥ **6** ॥

নিরীক্ষ্য স মুহূর্তং তু দদর্শ ভরতো গুরুম্।
উটজে রামমাসীনং জটাৱল্কলধারিণম্॥ **7** ॥

যদি বুদ্ধিঃ কৃতা দ্রষ্টুমগস্ত্যং তং মহামুনিম্।
অদ্যৈৱ গমনে বুদ্ধিং রোচযস্ৱ মহাযশঃ॥ **8** ॥

ভরতস্যার্যপুত্রস্য শ্ৱশ্রূণাং মম চ প্রভো।
মৃগরূপমিদং ৱ্যক্তং ৱিস্মযং জনযিষ্যতি॥ **9** ॥

গচ্ছ শীঘ্রমিতো রাম সুগ্রীৱং তং মহাবলম্।
ৱযস্যং তং কুরু ক্ষিপ্রং ইতো গৎৱাঽদ্য রাঘৱ॥ **10**॥

দেশকালৌ প্রতীক্ষস্ৱ ক্ষমমাণঃ প্রিযাঽপ্রিযে।
সুখদুঃখসহঃ কালে সুগ্রীৱৱশগো ভৱ॥ **11**॥

ৱন্দ্যাস্তে তু তপস্সিদ্ধাঃ তপসা ৱীতকল্মষাঃ।
প্রষ্টৱ্যাস্তেঽপি সীতাযাঃ প্রৱৃত্তিং ৱিনযান্ৱিতৈঃ॥ **12**॥

স নির্জিত্য পুরীং শ্রেষ্ঠাং লঙ্কাং তাং কামরূপিণীম্।
ৱিক্রমেণ মহাতেজা হনুমান্ মারুতাত্মজঃ॥ **13**॥

ধন্যা দেৱাস্স গন্ধর্ৱাঃ সিদ্ধাশ্চ পরমর্ষযঃ।
মম পশ্যন্তি যে নাথং রামং রাজীৱলোচনম্॥ **14**॥

মঙ্গলাভিমুখী তস্য সা তদাসীন্মহাকপেঃ।
উপতস্থে ৱিশালাক্ষী প্রযতা হৱ্যৱাহনম্॥ **15**॥

হিতং মহার্থং মৃদুহেতুসংহিতম্
ৱ্যতীত কালাযতি সংপ্রতিক্ষমম্।
নিশম্য তদ্ৱাক্যমুপস্থিতজ্ৱরঃ
প্রসঙ্গৱান্ উত্তরমেতদব্রৱীৎ॥ **16**॥

ধর্মাত্মা রক্ষসাং শ্রেষ্ঠঃ সংপ্রাপ্তোঽযং ৱিভীষণঃ।
লঙ্কৈশ্ৱর্যং ধ্রুৱং শ্রীমানযং প্রাপ্নোত্যকণ্টকম্॥ **17**॥

যো ৱজ্রপাতাশনিসন্নিপাতাৎ
ন চুক্ষুভে নাপি চচাল রাজা।
স রামবাণাভিহতো ভৃশার্তঃ
চচাল চাপং চ মুমোচ ৱীরঃ॥ **18**॥

যস্য ৱিক্রমমাসাদ্য রাক্ষসা নিধনং গতাঃ।
তং মন্যে রাঘৱং ৱীরং নারাযণমনামযম্॥ **19**॥

ন তে দদৃশিরে রামং দহন্তমরিৱাহিনীম্।
মোহিতাঃ পরমাস্ত্রেণ গান্ধর্ৱেণ মহাত্মনা॥ **20**॥

প্রণম্য দেৱতাভ্যশ্চ ব্রাহ্মণেভ্যশ্চ মৈথিলী।
বদ্ধাঞ্জলিপুটা চেদমুৱাচাগ্নি সমীপতঃ॥ **21**॥

চলনাৎপর্ৱতেন্দ্রস্য গণা দেৱাশ্চ কংপিতাঃ।
চচাল পার্ৱতী চাপি তদাশ্লিষ্টা মহেশ্ৱরম্॥ **22**॥

দারাঃ পুত্রাঃ পুরং রাষ্ট্রং ভোগাচ্ছাদন ভাজনম্।
সর্ৱমেৱাৱিভক্তং নো ভৱিষ্যতি হরীশ্ৱর॥ **23**॥

যামেৱ রাত্রিং শত্রুঘ্নঃ পর্ণশালাং সমাৱিশৎ।
তামেৱ রাত্রিং সীতাপি প্রসূতা দারকদ্ৱযম্॥ **24**॥

ইদং রামাযণং কৃৎস্নং গাযত্রীবীজসংযুতম্।
ত্রিসন্ধ্যং যঃ পঠেন্নিত্যং সর্ৱপাপৈঃ প্রমুচ্যতে॥ **25**॥

যাৱদাৱর্ততে চক্রং যাৱতী চ ৱসুন্ধরা।
তাৱৎৱর্ষ সহস্রাণি স্ৱামিৎৱং অৱধারয॥ **26**॥

॥ ইতি শ্রীগাযত্রীরামাযণং সমাপ্তম্॥